International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(3): 12-18
© 2024 IJSR
www.anantaajournal.com
Received: 22-02-2024
Accepted: 26-03-2024

**शुभेन्दुभट्टाचार्यः**
शोधछात्रः, संस्कृतविभागे,
बाँकुडाविश्वविद्यालयस्य,
बाँकुडा, पश्चिमबङ्गम्, भारतम्

**Corresponding Author:**
**शुभेन्दुभट्टाचार्यः**
शोधछात्रः, संस्कृतविभागे,
बाँकुडाविश्वविद्यालयस्य,
बाँकुडा, पश्चिमबङ्गम्, भारतम्

# न्यायवैशेषिकशास्त्रे कर्मस्वरूपम्

## शुभेन्दुभट्टाचार्यः

**DOI:** https://doi.org/10.22271/23947519.2024.v10.i3a.2362

**सारांशः**
न्यायवैशेषिकशास्त्रं हि भारतीयास्तिकदर्शनप्रस्थानानां स्तम्भस्वरूपम्। सिद्धान्तानां साम्यबाहुल्य्यात् न्यायवैशेषिकयोः समानतन्त्रत्वं प्रसिद्धम्। वैशेषिकस्वीकृतेषु द्रव्यगुणकर्मसामान्यविशेषसमवायाभावरूपसप्तपदार्थेषु तृतीयपदार्थः कर्म अन्यतमतां भजते। यद्यपि प्राचीनन्याये प्रमाणप्रमेयादिषोडशपदार्थाः प्रतिपादिताः, तथापि नव्यन्याये वैशेषिकाणामिव द्रव्यादिसप्तपदार्थाः स्वीक्रियन्ते। तथा च भाषितं भाष्ये - "अस्त्यन्यदपि द्रव्यगुणकर्म्मसामान्यविशेषसमवायाः प्रमेयम्"। तस्मात् कर्मणः पदार्थत्वं नैयायिकैरपि अङ्गीकृतमिति ज्ञायते। कर्मपदार्थस्य अनङ्गीकारे तु वस्तुषु क्रियोत्पादनादिविषयाणां काऽपि व्याख्या न स्यात्। कर्मणः सहकारित्वं व्यतिरिच्य तेषां सिद्धान्तानां तथा विचाराणां विनाशः निश्चितः एव। अतः कर्मणः एवं माहात्म्यं परिलक्ष्य कर्मणोऽस्य लक्षणं प्रमाणमुत्पत्तिस्तथा स्वरूपं विभागश्चात्र निबन्धे विषयत्वेन आचिताः। अनेन च न्यायवैशेषिककर्मविषयकं सुस्पष्टं ज्ञानं भविष्यतीति।

**कूटशब्दः** कर्म, क्रिया, संयोगः, विभागः, वेगः, असमवायिकारणम्, प्रमाणम्

प्रस्तावना
यत्क्रियते तदिति कृधातोः मनिन्प्रत्ययेन[1] कर्मपदस्य व्युत्पत्तिः। संस्कृतशास्त्रग्रन्थेषु कर्म इति पदस्य बहुधा प्रयोगो दृश्यते। कर्मपदेन भिन्नभिन्नशास्त्रेषु भिन्नं भिन्नमर्थं प्रतिपादितम्। यथा हि व्याकरणशास्त्रे क्रियाजन्यफलाश्रितत्वं कर्मत्वमिति प्रतिपादितम्। व्युत्पत्तिवादे गदाधरेणोक्तम् – कर्मत्वञ्च क्रियाजन्यफलशालित्वम् [2] इति। महर्षिपाणिनिनोक्तम् – कर्तुरीप्सिततमं कर्म[3] इति। वस्तुतः करोतेर्निखिलक्रियावाचकत्वात् कर्त्तुर्व्यापारैः यत् साध्यते तत् कर्म। तेन क्रियाव्याप्यं कर्म [4] इत्यर्थोऽपि आयाति। तच्च निर्व्वर्त्यविकार्यप्राप्यानीप्सितभेदेन चतुर्विधम्[5]। वेदान्तादिशास्त्रेषु तु कर्म पदं

---

1 शब्दकल्पद्रूमे, ४५ पृष्ठाङ्के

2 कारकविवेके, ३६ पृष्ठाङ्के

3 १. ०४. ४९ पाणिनीयसूत्रम्

4 शब्दकल्पद्रूमे, ४६ पृष्ठाङ्के

5 निर्व्वर्त्त्यं च विकार्य्यं च प्राप्यं च त्रिविधं मतम्।
तत्रेप्सिततमं कर्म्म चतुर्धाऽन्यत्तु कल्पितम्।।
औदासीन्येन यत् प्राप्तं यच्च कर्त्तुरनीप्सितम्।
संज्ञान्तरैरनाख्यातं यद् यद्वाप्यन्यपूर्व्वकम्।। (वाक्यपदीये तृतीये काण्डे)

पापपुण्याद्यदृष्टफलकत्वेन गृहीतम्। तच्च काम्यनिषिद्धनित्यनैमित्तिकादिभेदेन षड्विधम्[6]। योगसूत्रे महर्षिणा पतञ्जलिना सोपक्रमनिरुपक्रमभेदेन कर्मणः द्वैविध्यमुक्तम्[7]। पुनश्च शुक्लकृष्णादिभेदेन कर्म विभक्तं दृश्यते।[8] क्वचित् तत् सात्त्विकादिभेदेन त्रिधा[9]। क्वचिच्च कर्मपदं कर्तव्यार्थमपि ज्ञापयती[10]त्येवं कर्मणः विविधाः अर्थाः शास्त्रेष्वुपलभ्यन्ते।

## न्यायवैशेषिकमते कर्म

न्यायवैशेषिकशास्त्रानुसारं यत् कर्म पदार्थत्वेन स्वीक्रियते तत्तु न क्रियाजन्यफलाश्रयि न च स्वर्गाद्यदृष्टफलकम्, तन्मते कर्मपदार्थः द्रव्याणां स्थानान्तरगमनस्य कारणीभुता क्रिया एव।[11] अत्रावधेयं यत्, क्रिया कर्म च न समानार्थकौ। कर्म हि चलनात्मकं, वस्तुनः स्थानान्तरगमनहेतुः। क्रिया तु पचत्यादयः। तथापि क्रिया कर्म च समानार्थकत्वेन व्यवहृयते। यथा हि, पाकक्रिया पाककर्म च इत्योतौ समानार्थकौ। ननु अर्थभिन्नत्वेऽपि कथं समानार्थकत्वेन प्रयोगः। तत्र वक्तुं शक्यते यत्, वस्तुतः पचत्यादिक्रियाः नैककर्मणां समाहारविशेषाः ओदनविक्लित्त्यादिफलकाः। कर्म तु केवलम् उत्तरदेशसंयोगफलकम्। तथात्वेऽपि कर्मसामाहारत्वात् क्रियापदेन कर्म अपि बुध्यते। वस्तुतस्तु, क्रियापदोच्चारणेन सद्यमेव कर्मणां स्मरणं भवति। अतः क्रियापदं कर्मसमानार्थकतया प्रयुज्यते। किञ्च क्रिया कर्म व्यतिरेकेण न चिन्तयितुं न शक्यते। तस्मात् यत्र क्रियेति उच्चार्य्यते तत्र कर्म अवश्यमेव तिष्ठेत्।

ननु कर्मणोऽस्य स्वरूपं किम्। किञ्च लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरिति किमस्ति कर्मणः लक्षणम्, कर्मास्तित्वे च किमस्ति प्रमाणमिति। अतः आदौ कर्मणः लक्षणं प्रमाणञ्च निरूप्यते।

कर्मलक्षणपर्यालोचनावसरे आदावेव कर्मत्वजातिमत् कर्म[12] इति लक्षणं मनसि आगच्छति। परन्तु कर्मत्वजातिमदिति लक्षणेन कर्मविषयकं स्पष्टं ज्ञानं न भवति। कर्मत्वस्य ज्ञानमन्तरेण कर्मत्वजातिमतो ज्ञानं न सम्भवति। तत्र बालानां सुखबोधाय रचिते तर्कसंग्रहे अन्नंभट्टेन कर्मलक्षणमुक्तम् – चलनात्मकं कर्म[13] इति। द्रव्यस्य स्थानान्तरगमनं हि चलनम्, तदात्मस्वरूपं यस्य तत् कर्म। अत्र आत्मपदस्यार्थः स्वरूपम्। परमार्थतः अस्मदादीनां स्वरूपं न तु शरीरं परन्तु आत्मा एवेति आत्मपदस्य स्वरूपवाचित्वम्। तर्कसंग्रहदीपिकायामुक्तम् – संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म[14] इति। अर्थात् यत् संयोगस्य असमवायिकारणं भवति परन्तु संयोगो न तत् कर्म। असमवायिकारणं नाम यत् कार्य्येण कारणेन वा सह एकस्मिन्नर्थे समवेतं तिष्ठत् कार्यस्य कारणं भवति[15] तदिति। यथा हि पटं प्रति तन्तुसंयोगः असमवायिकारणम्। यतो हि पटोत्पत्तौ पटसमवायिकारणे तन्तौ तन्तुसंयोगः समवायेन तिष्ठन् पटस्य कारणं भवति। तथा च संयोगोत्पत्तौ कर्म संयुज्यमानद्रव्येषु समवायसम्बन्धेन तिष्ठत् संयोगमुत्पादयति। अतः संयोगं प्रति संयुज्यमानद्रव्यसमवेतकर्म असमवायिकारणं भवतीति संयोगासमवायिकारणत्वं कर्मत्वम्। अत्रावधेयं यत्, न हि संयोगः सदैव कर्मजन्यो भवति। संयोगः कदाचित् संयोगजन्योऽपि भवितुमर्हति[16]। यथा हि कर्मजन्यहस्तपुस्तकसंयोगात् शरीरपुस्तकयोरपि संयोगो भवतीति अनुभवसिद्धम्। परन्तु हस्तपुस्तकयोः संयोगं प्रति कर्मणः असमवायिकारणतायामपि शरीरपुस्तकयोः संयोगं प्रति तस्य कारणता नास्ति। यतो हि कर्म न हि शरीरसमवेतं न च पुस्तकसमवेतं तिष्ठति। किञ्च शरीरपुस्तकसंयोगोत्पत्तौ हस्तपुस्तकसंयोगः पुस्तके तथा शरीरे समवायसम्बन्धेन तिष्ठति। तेन च हस्तपुस्तकसंयोगेन शरीरपुस्तकसंयोगः जायते। अतः शरीरपुस्तकसंयोगः हस्तपुस्तकसंयोगजन्यः। पूर्वसंयोगश्च परस्यासमवायिकारणमेव भवति। तादृशसंयोगजनकसंयोगे अतिव्याप्तिवारणाय संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म इति वक्तव्यम्।

द्रव्यत्वं गुणत्वं कर्मत्वञ्च इत्येते सत्तायाः साक्षाद्व्याप्यजातयः। तेन द्रव्यत्वगुणत्वभिन्नत्वे सति सत्तासाक्षाद्व्याप्यजातिमत्त्वम् इति[17] कर्मलक्षणं वक्तुं शक्यते। परन्तु अनेनापि लक्षणेन कर्मत्वजातिमत् कर्म इत्यर्थमेव आयाति। ननु लक्षणस्यास्य

---

6 वेदान्तसारस्य अधिकारिनिर्णये

7 सोपक्रमं निरुपक्रमञ्च कर्म्म तत् (योगसूत्रस्य विभूतिपादे २३)

8 कर्म्माशुक्लकृष्णं योगिनस्त्रिविधमितरेषाम्। (योगसूत्रस्य कैवल्यपादे ७)

9 ज्ञानं कर्म कर्ता च त्रिविधैव गुणभेदतः। श्रीमद्भगवद्गीतायाम् (१८. १९)

10 शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्म<u>कर्म</u> स्वभावजम्।। श्रीमद्भगवद्गीतायाम् (१८. ४२)

11 क्रियामात्रवृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वमिति शङ्करमिश्राः प्राहुः। (तर्कसंग्रहदीपिकायाम्)
चलतीति प्रत्ययासाधारणकारणतावच्छेदकजातिमत्त्वम् (उपस्कारटीकायाः १. १. १७ सूत्रस्य व्याख्यायम्)

12 कर्मत्वमिति भाष्यकाराः (तर्कसंग्रहदीपिकायाम्)

13 तर्कसंग्रहे, ४७० पृष्ठाङ्के

14 तर्कसंग्रहे, ३७ पृष्ठाङ्के

15 कार्यैकार्थकारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं
ज्ञानादिभिन्नम् असमवायिकारणमिति (सिद्धान्तमुक्तावल्याम्)

16 अप्राप्तस्तु या प्राप्तिः सैव संयोग ईरितः।
कीर्त्तितस्त्रिविधस्त्वेव आद्योऽन्यतरकर्मजः।।
तथोभयक्रियाजन्यो भवेत् संयोगजोऽपरः। (कारिकावल्याम् ११५-११६)

17 प्रशस्तपादभाष्ये, २३३ पृष्ठाङ्के

सामान्यादिपदार्थेषु अतिव्याप्तिः स्यादिति वक्तुं न शक्यते। यतो हि सामान्यादौ तु जातिः न स्वीक्रियते जातिबाधकनियमात्[18]।

महर्षिकणादः वैशेषिकसूत्रग्रन्थे कर्मलक्षणमाह- एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम्[19] (१।१।७) इति। एकद्रव्यमिति पदस्यार्थो हि एकमेव द्रव्यं आश्रयः यस्य[20] इति। न हि एकद्रव्यपदस्य एकं द्रव्यमित्यर्थो ग्राह्यः। अन्यथा तु द्रव्यस्य कर्मत्वापत्तिः स्यात्। कर्म सदैव एकद्रव्यवृत्ति भवतीति एकद्रव्यम्। कारणाकारणसंयोगस्तथा कारणाकारणविभागः द्विनिष्ठो भवति। अतः तत्र अतिव्याप्तिवारणाय एकद्रव्यमित्युक्तम्। ननु संयोगस्य उभयनिष्ठत्वे एकद्रव्यनिष्ठत्वस्यापि कारणतास्ति। तेन संयोगस्यापि एकद्रव्यवृत्तित्वात् तत्र अतिव्याप्तिरेव इति चेन्न, एकमेव द्रव्यं आश्रयः यस्येति एवकारेण तन्निरासात्। न हि संयोग एकद्रव्यमात्रवृत्तिः भवति। ननु एकद्रव्यं नाम अनेकद्रव्यभिन्नम्, तस्मात् परमाणूनां नित्यत्वे अवृत्तित्वे अनेकद्रव्यभिन्नत्वे च परमाणुषु लक्षणस्यास्य अतिव्याप्तिः स्यादतः अगुणमित्युक्तम्। अगुणं नाम न विद्यते गुणः अस्मिन्निति। परमाणवस्तु निर्गुणाः न भवति, तेन तत्र नातिव्याप्तिः। अतएव एकद्रव्याश्रयि निर्गुणं कर्म इति कर्मलक्षणं सिध्यति। परन्तु विशेषपदार्थस्य एकैकद्रव्यवृत्तित्वात् गुणरहितत्वाच्च लक्षणस्यास्य विशेषपदार्थे अतिव्याप्तिः स्यात्[21]। अतः एकद्रव्यवृत्ति गुणरहितं संयोगविभागेषु अनपेक्षकारणं कर्म इत्येवं वक्तव्यम्।

ननु संयोगार्थं कर्म तत्समवायिकारणं हस्तादिकं तथा पूर्वदेशसंयोगनाशमपेक्ष्यते। अतः कथं कर्मण अनपेक्षकारणत्वं सिध्यति। तत्रोच्यते अनपेक्षत्वं नाम स्वोत्पत्त्यनन्तरोत्पत्तिकभावभूतानपेक्षत्वमिति। हस्तादिसमवायिकारणानां कर्मोत्पत्तिपूर्ववृत्तित्वात् पूर्वसंयोगनाशस्य च अभावात्मकत्वात् तेषामपेक्षायामपि कर्मणः अनपेक्षत्वं नासिद्धमिति।

कर्मलक्षणसूत्रस्यास्य व्याख्यायां शङ्करमिश्रः सूत्रोक्तलक्षणमालोच्य पुनः कर्मणः लक्षणचतुष्टयं प्रतिपादितम्। तानि लक्षणानि चात्र आलोच्यन्ते।

शङ्करमिश्रोक्तमाद्यं लक्षणं तावत्, नित्यावृत्तिसत्तासाक्षाद्व्याप्यजातिमत्त्वं कर्मत्वम्[22] इति। द्रव्यत्वं गुणत्वं कर्मत्वञ्चेति जातित्रयं सत्तायाः साक्षाद्व्याप्यम्। परन्तु द्रष्टव्यं यत्, द्रव्यत्वं यथा घटाद्यनित्यद्रव्यवृत्ति भवति तथैव क्षित्यादिनित्यद्रव्यवृत्ति अपि भवति। एवं गुणत्वमपि नित्यानित्यवृत्ति भवति। कर्मत्वजातिस्तु सर्वदैव अनित्यद्रव्यवृत्तिः नाम नित्यावृत्तिः भवति। ननु कथमिति चेन्न, कर्मणः अनित्यत्वात्। तेन सत्तासाक्षाद्व्याप्यनित्यावृत्तिजातिः कर्मत्वमेवेति तज्जातिमत् कर्म। ननु नित्यावृत्तिर्नाम अनित्यवृत्तिः इति वक्तुं न शक्यते। द्रव्यत्वगुणत्वयोरपि अनित्यवृत्तित्वात् तयोः अतिव्याप्तिः स्यादिति।

द्वितीयं लक्षणं तावत्, चलतीति प्रत्ययासाधारणकारणतावच्छेदकजातिमत्त्वम्[23] इति। अर्थात् चलतीत्येवं ज्ञानात्मककार्यस्य असाधारणकारणनिष्ठकारणतावच्छेदकजातिमत् कर्म। चलतीति प्रतीतिविषयस्य हेतुः हि कर्म, तच्चासाधारणं कारणम्। अत्र च असाधारणकारणतावच्छेदकजातिः कर्मत्वम्। ननु चलतिप्रतीतेः असाधारणं कारणम् आत्ममनःसंयोगोऽपि भवितुमर्हति। अतः तत्रातिव्यापिरिति वक्तुं न शक्यते। यतो हि अत्र असाधारणत्वं हि तत्प्रत्ययेतरवृत्ति कार्यत्वानिरूपितत्वमिति। चलतिप्रत्ययेतरञ्च घटज्ञानम्, आत्ममनःसंयोगस्य च तद्घटज्ञाननिरूपितकारणतास्ति। अतः तत्प्रत्ययेतरवृत्तिकार्यत्वानिरूपितत्वाभावात् आत्ममनःसंयोगे नातिव्याप्तिः।

तृतीयं लक्षणं तावत्, गुणान्यनिर्गुणमात्रवृत्तिजातिमत्त्वम्[24] इति। गुणान्यं गुणभिन्नं निर्गुणं गुणरहितं तद्वृत्तिजातिः कर्मत्वं तद्वत्वमित्यर्थः। सामान्यादिपदार्थाः गुणरहिताः अपि न जातिमन्तः इति सामान्यादौ नातिव्यापिः। द्रव्यं गुणभिन्नमपि न निर्गुणमिति द्रव्येऽपि नातिव्याप्तिः। अतः कर्म एव गुणभिन्नं गुणरहितञ्च जातिमत्। तद्वृत्तिजातिमत्त्वं कर्मत्वमिति सिध्यति।

चतुर्थं लक्षणं तावत् – स्वोत्पत्त्यव्यवहितोत्तरक्षणवृत्तिविभागकारणतावच्छेदकजातिमत्त्वम्[25] इति। द्रव्यस्य उत्तरदेशसंयोगार्थं द्रव्ये आदौ कर्मोत्पद्यते, ततः विगागः जायते, ततः पूर्वसंयोगनाशः, ततश्चोत्तरदेशसंयोगः। अतः दृश्यते कर्मोत्पत्तेः अव्यवहितपरक्षणे विभागः उत्पद्यते। तत्कर्म तद्विभागस्य कारणमिति नास्ति सन्देहः। अतः तद्विभागकारणतावच्छेदकजातिश्च कर्मत्वम्, तद्धर्मवत् कर्म इत्यर्थः।

## कर्मणि प्रमाणम्

न्यायवैशेषिकानां नये कर्मपदार्थो हि प्रत्यक्षप्रमाणेनैव उपलभ्यते। ननु कस्मिंश्चित् द्रव्ये कर्म जायते चेत्, तस्य

---

18 व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽनवस्थितिः।
रूपहानिरसम्बन्धो जातिबाधकसंग्रहः।। (कारिकावल्याम्)

19 सेख-साविर-आलि-सम्पादिते वैशेषिकसूत्रोपस्कारे, १६३ पृष्ठाङ्के

20 एकमेव द्रव्यमाश्रयो यस्य तदेकद्रव्यम्। (उपस्कारटीकायाम्)

21 वैशेषिकसूत्रोपस्कारग्रन्थे

22 सेख-साविर-आलि-सम्पादिते वैशेषिकसूत्रोपस्कारे, १६४ पृष्ठाङ्के

23 तदेव

24 तदेव

25 तदेव

द्रव्यस्य पूर्वदेशात् विभागस्तथा स्थानान्तरसंयोगो भवति। अतः संयोगविभागद्वारा द्रव्ये कर्म अनुमीयते इति वक्तुं न शक्यते। आकाशे निक्षिप्तस्य वाणस्य संयोगविभागौ न उपलभ्येते। तेन आकाशनिक्षिप्तवाणे कर्म अनुमातुं न शक्यते। तथापि तस्मिन् वाणे क्रिया अस्तीति अनुभवो जायते एव। तर्हि तदनुभवो न हि अनुमानेन परन्तु प्रत्यक्षेणैव गृह्यते। अतएव न्यायसिद्धान्तमुक्तावल्यामुक्तम् – कर्मत्वजातिस्तु प्रत्यक्षसिद्धा [26] इति। उपस्कारटीकायामपि शङ्करमिश्रेणोक्तम् – रूपवद्द्रव्यसमवायाच्च **प्रत्यक्षता** [27] इति। अर्थात् द्रव्यं प्रत्यक्षेण ग्राह्यं द्रव्यस्य रूपवत्त्वात्, रूपवति द्रव्ये च कर्म समवायेन तिष्ठति। अतः रूपवद्द्रव्यस्थं कर्म प्रत्यक्षीभवति। अनेन इदमपि सूचीतं यत्, न हि रूपरहितद्रव्यवृत्तिकर्मणः प्रत्यक्षं सम्भवति। अतः घटादिवृत्तिकर्मणः प्रत्यक्षानुभवः सम्भवति परन्तु मनोवृत्तिकर्मणः प्रत्यक्षानुभवो न सम्भवति। अत्रावधेयं यत्, योग्यवृत्ति कर्म संयुक्तसमवायसन्निकर्षेण कर्मत्वञ्च संयुक्तसमवेतसमवायसन्निकर्षेण प्रत्यक्षयोग्यं भवति।

## कर्मोत्पत्ति

द्रव्यसमवेतं कर्म द्रव्यवृत्तिसंयोगविभागयोः हेतुरिति तु ज्ञातम्। अथ द्रव्येषु कर्म कथम् उत्पद्यते, कथम्प्रकारेण कर्म संयोगं विभागञ्चो उत्पादयतीति आलोच्यते। कर्म हि तत्समवायिकारणेषु द्रव्येषु समवायसम्बन्धेन उत्पद्यते। तत्र कर्म कदाचित् आत्मसंयोगप्रयत्नाभ्यां जायते कदाचित् केवलं संयोगाभिधातात् गुरुत्वादिभिरपि जायते। यथा हि हस्तादौ जायमानं कर्म आत्मसंयोगप्रयत्नाभ्यां जायते[28], मुसलादौ प्रयत्नवदात्मसंयुक्तहस्तमुसलादिसंयोगात् जायते [29]। एवं अभिघातादपि मुसलादीनां उत्पतता[30], गुरुत्वात् पतनमपि जायते [31]। वस्तुतः प्रयत्नवदात्मसंयोगजन्यं कर्म मुख्यम्, अभिघातादिजन्यकर्म गौणमित्युच्यते।

कर्म हि पञ्चक्षणस्थायि भवति। कथमित्युच्यते, प्रथमक्षणे कर्म तत्समवायिकारणे उत्पद्यते, द्वितीयक्षणे विभागं जनयति, तृतीयक्षणे पूर्वदेशसंयोगं नाशयति, चतुर्थक्षणे उत्तरदेशसंयोगं साधयति, पञ्चमक्षणे च कर्मणः नाशः इति। यथा हस्तपुस्तकसंयोगे प्रथमक्षणे हस्ते कर्म उत्पद्यते, द्वितीयक्षणे हस्तेन पूर्वदेशस्य विभागः, तृतीयक्षणे हस्तेन पूर्वदेशस्य संयोगनाशः, चतुर्थक्षणे हस्तपूस्तकसंयोगरूपोत्तरदेशसंयोगः जायते, ततश्च हस्तसमवायि कर्म विनष्टं भवतीति।

## कर्मस्वरूपम्

कर्मपदार्थस्य केचित् विशेषधर्माः वर्तन्ते। तेषां कर्मवृत्तिधर्माणां[32] सम्यक् ज्ञानेन कर्मस्वरूपं स्पष्टतया ज्ञातुं शक्यते। अतः कर्मणः ते धर्माः अत्र निरूप्यन्ते।

## एकद्रव्यवृत्तित्वम्

कर्मलक्षणे आदावेव आलोचितं यत् कर्म सदैव एकद्रव्याश्रयि भवति। न हि कदापि एकाधिकद्रव्ये कर्म स्थातुमर्हति। ननु एकेनैव प्रयत्नेन बहुद्रव्यचालनात् कर्म बहुद्रव्यवृत्ति भवतीति वक्तु न शक्यते। तत्र एकेनैव प्रयत्नेन भिन्नभिन्नद्रव्येषु भिन्नं भिन्नं कर्म उत्पद्यते, न तु एकमेव। किञ्च तेषु द्रव्येषु यदि एकमेव कर्म स्यात्तदा एकस्मिन् कर्मनाशे सति सर्वद्रव्यवृत्तिकर्मणामपि नाशः स्यात्। अतः कर्म एकद्रव्याश्रयि एव।

## क्षणिकत्वम्

कर्म हि क्षणिकमिति न्यायवैशेषिकाचार्याः वदन्ति। अत्र क्षणिकत्वमित्यनेन क्षणैकमात्रवृत्तित्वमित्येवं न ध्येयम्। अपि तु कर्मणः पञ्चक्षणस्थायित्वं ज्ञेयम्। पूर्वमेव आलोचितं यत् कर्म प्रथमक्षणे तत्समवायिकारणे उत्पद्यते, द्वितीयक्षणे विभागं जनयति, तृतीयक्षणे पूर्वदेशसंयोगं नाशयति, चतुर्थक्षणे उत्तरदेशसंयोगं साधयति, पञ्चमक्षणे च तस्य कर्मणः नाशो भवति। अतएव पञ्चक्षणस्थायित्वेन कर्मणः क्षणिकत्वं सिध्यतीति।

## मूर्तद्रव्यवृत्तित्वम्

कर्म हि सदैव मूर्तद्रव्यवृत्ति भवति। अमूर्तद्रव्येषु तथा विभुद्रव्येषु कर्मोत्पत्तिः न सम्भवति। आकाशदिगात्मकालाः विभुपदार्थाः। तेषां विभुत्वात् ते सकलपदार्थसंयोगिनः भवन्ति। न हि तेषां कस्मादपि विभागः सम्भवति न च पुनः

26 भाषापरिच्छेदे, ४४ पृष्ठाङ्के

27 सेख-साविर-आलि-सम्पादितः वैशेषिकसूत्रोपस्कारः, (सूत्रम् १.१.७ ) पृष्ठाङ्कः ९९

28 आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म (वै.सू. ५.१.१), श्रीनारायणमिश्रसम्पादित वैशेषिकसूत्रोपस्कारः, पृष्ठाङ्कः २९५

29 तथा हस्तसंयोगाच्च मुसले कर्म(वै.सू. ५.१.२), श्रीनारायणमिश्रसम्पादित वैशेषिकसूत्रोपस्कारः, पृष्ठाङ्कः २९६

30 अभिघातजे मुसलादौ ... (वै.सू. ५.१.३), श्रीनारायणमिश्रसम्पादित वैशेषिकसूत्रोपस्कारः, पृष्ठाङ्कः २९६

31 संयोगाभावे गुरुत्वात् पतनम् (वै.सू. ५.१.७), श्रीनारायणमिश्रसम्पादित वैशेषिकसूत्रोपस्कारः, पृष्ठाङ्कः२९९

32 उत्क्षेपणादीनां पञ्चानामपि कर्मसम्बन्धः। एकद्रव्यवत्त्वं क्षणिकत्वं मूर्तद्रव्यवृत्तित्वम् अगुणवत्वं गुरुत्वद्रवत्वप्रयत्नसंयोगजत्वं स्वकार्यसंयोगविरोधित्वं सोंगविभागनिरपेक्षकारणत्वम् असमवायिकारणत्वं स्वपराश्रयसमवेतकार्यारम्भकत्वं समानजातीयानारम्भकत्वं द्रव्यानारम्भकत्वं च प्रतिनियतजातियोगित्वम्। दिग्विशिष्टकार्यारम्भकत्वं च विशेषः। (प्रशस्तपादभाष्ये २९० पृष्ठायाम्)। एतत्सर्वमपि पञ्चानां साधर्म्यम्। (न्यायकन्दली)

संयोगः। अतः संयोगविभागकारणं कर्म आकाशाद्यमूर्तद्रव्येषु स्थातुं नार्हति। अर्थात् कर्म मूर्तद्रव्याश्रयि एव भवतीति सिध्यति।

**गुणरहितत्वम्**

कर्म हि निर्गुणं भवति। कर्म संयोगादिगुणजनकमपि गुणरहितमेव। गुणाः हि द्रव्येषु तिष्ठन्ति। किञ्च गुणवत्ता द्रव्यस्य लक्षणम्। गुणवत्वे तु कर्मणः द्रव्यसंज्ञायाः आपत्तिः स्यात्। अतः कर्मणः पृथक्पदार्थत्वमेव न स्यात्।

**गुरुत्वादिगुणजन्यत्वम्**

कर्म गुरुत्वादिगुणजन्यं भवति। आदिशब्देन अत्र द्रवत्वं प्रयत्नं संयोगश्च इति ज्ञेयम्। द्रव्याणां गुरुत्ववत्वात् पतनं, द्रवत्ववत्वात् जलादीनां स्यन्दनं जायते, हस्तादिषु कर्मोत्पत्तौ प्रयत्नं कारणं भवति। किञ्च प्रयत्नवदात्मसंयुक्तहस्तसंयोगेन कदाचित् अभिघातरूपसंयोगेन च मुसलादौ कर्म उत्पद्यते। अतः कर्म गुरुत्वादिगुणजन्यमिति सिध्यति।

**स्वकार्यविरोधित्वम्**

कर्म हि स्वकार्यविरोधि। अत्र स्वकार्यविरोधिशब्देन स्वकार्यमेव यस्य विरोधी इत्येवमर्थोऽवगन्तव्यः। न हि स्वकार्यस्य विरोधी इत्येवमर्थोऽनुसन्धेयः। कर्म तत्कार्येण उत्तरदेशसंयोगेन विनश्यति। उत्तरदेशसंयोगोत्पत्त्यर्थं कर्म जायते। तमुत्तरदेशसंयोगमुत्पाद्य च कर्म नश्यति। अतः उत्तरदेशसंयोगः एव कर्मनाशे कारणमिति वक्तुं शक्यते। इत्येवं कर्म स्वकार्योत्तरदेशसंयोगनाश्यमिति सिध्यति।

**संयोगविभागनिरपेक्षकारणत्वम्**

कर्म हि संसोगविभागयोः निरपेक्षं नाम अनपेक्षं कारणमिति पूर्वमेव प्रतिपादितम्। यथा वेगारम्भे नोदनाभिघातमपेक्षा भवति, न हि कर्मणा संयोगविभागारम्भे नोदनादिकमपेक्ष्यते। अतः कर्म अनपेक्षकारणम्। ननु कर्म तत्समवायिकारणहस्तादिकमपेक्ष्यते इति तस्यानपेक्षत्वं नेति वक्तुं न शक्यते। पूर्वमेव प्रतिपादितं यत्, अनपेक्षत्वं नाम स्वोत्पत्त्यनन्तरोत्पत्तिकभावभूतानपेक्षत्वमिति।

**असमवायिकारणत्वम्**

कर्म सदैव तत्समवायिकारणे समवायसम्बन्धेनोत्पद्यते। अतः कर्म तत्समवायिकारणे समवेतं तिष्ठत् एव तत्समवायिकारणे संयोगमुत्पादयति। तेन हस्तादिसमवायिकारणसमवेतं कर्म संयोगविभागरूपकार्यस्य असमवायिकारणं भवति। किञ्च द्रव्यसमवेतत्वेन कर्म सर्वदा असमवायिकारणमेव भवति नान्यः।

**स्वपराश्रयसमवेतकार्यारम्भकत्वम्**

कर्म स्वाश्रये पराश्रये च व्यासजवृत्तिना समवेतं तिष्ठत् कार्यारम्भकं भवतीति कर्मणः स्वाश्रयपराश्रयसमवेतकार्यारम्भकता। यथा प्रस्तरखण्डस्योत्क्षेपणक्रियायां कर्मणः स्वाश्रयः भवति हस्तः, पराश्रयः च भवति प्रस्तरखण्डम्। कर्म स्वाश्रये हस्ते तथा पराश्रये प्रस्तरखण्डे व्यासजवृत्तिना तिष्ठत् प्रस्तरखण्डोत्तरदेशसंयोगरूपकार्यम् उत्पादयति। अतः कर्म स्वाश्रयपराश्रयसमवेतकार्यारम्भकम्।

**समानजातीयानारम्भकत्वम्**

कर्म न हि तत्समानजातीयारम्भकं भवति। कर्मसमानजातीयं नाम कर्म एव। अर्थात् कर्म कदापि कर्मान्तरं न जनयति। द्रव्यं द्रव्यान्तरमुत्पादयति, गुणश्च गुणान्तरम् उत्पादयति परन्तु कर्म कर्मान्तरं नोत्पादयति। ननु कर्म यदि कर्मान्तरमुत्पादयति तदा गमनं गमनान्तरमुत्पादयिष्यति। तेन तु गमनक्रियायाः निवृत्तिरेव न स्यात्। ननु क्रियाविशिष्टद्रव्यसंयोगात् द्रव्यान्तरेऽपि चलनमुत्पद्यते तर्हि कर्म कर्मान्तरं जनयति इत्येवं वक्तुं न शक्यते। यतो हि द्रव्यान्तरे उत्पद्यमानं चलनं तु पूर्वकर्मणः संस्कारविशेषम्, न हि कर्मान्तरमिति ज्ञेयम्।

**द्रव्यानारम्भकत्वम्**

कर्म न हि केवलं कर्मानराम्भकमपि तु द्रव्यानारम्भकञ्च भवति। कर्म गुणजनकमपि द्रव्यजनकं न भवति। ननु क्रियाविशिष्टकपालद्वयादिसंयोगादेव घटादिकमुत्पद्यते। तस्मात् घटादिद्रव्योत्पत्तौ कर्म कारणं भवत्येव इति वक्तु न शक्यते। यतो हि कर्म उत्तरदेशसंयोगनाश्यं भवति। अर्थात् कपालद्वये कर्मोत्पत्तिः, ततः विभागः, ततः पूर्वसंयोगनाशः, ततः उत्तरदेशसंयोगः, ततश्च कर्म विनश्यति। यद्यपि कपालद्वयसंयोगासमवायिकारणं कर्म, तथापि घटारम्भकाले कर्म न तिष्ठति। अतः कर्म घटादिद्रव्यानारम्भकम्।

**दिग्विशिष्टकार्यारम्भकत्वम्**

कर्म सदैव दिग्विशिष्टकार्यारम्भकं भवति। अर्थात् कर्म दिग्विविशेषेण सम्बन्धयुक्तं कार्यं नाम संयोगमुत्पादयति। कर्मफलं हि उत्तरदेशसंयोगः। तदुत्तरदेशसंयोगः कदाचित् उर्ध्वदेशसम्बद्धः कदाचिदधोदेशसम्बद्धः कदाचित् तिर्यग्देशसम्बद्धः इत्येवं दिग्विशेषसम्बन्धयुक्त एव भवति इति कर्म दिग्विशिष्टकार्यारम्भकम्।

**बहुगुणजन्यत्वम्**

कर्म गुरुत्वादिगुणजन्यमिति पूर्वमेव आलोचितम्। परन्तु कर्म न हि केवलं गुणजन्यं परन्तु बहुगुणजन्यमपि भवति। यथा हि उत्क्षेपणक्रियायां गुरुत्वं प्रयत्नं संयोगश्च प्रत्येकं कारणं

भवति। तदुक्तं सूत्रे – गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् (१.१.२८) इति[33]। अतः कर्म गुरुत्वादिबहुगुणजन्यं भवतीति सिद्धम्।

**संयोगविभागवेगसामान्यकारणत्वम्**

कर्म संयोगाविभागरूपगुणजनकमिति संयोगविभागानपेक्षकारणमित्यननैव अस्भाभिर्ज्ञायते। परन्तु अत्र इदमेव वक्तव्यं यत्, कर्म न केवलं संयोगविभागयोः अपितु वेगस्यापि कारणं भवति। किञ्च कर्म संयोगविभागवेगानां सामान्यकारणमेव भवति। अर्थात् एकेनैव कर्मणा संयोगाः विभागास्तथा वेगमपि उत्पद्यन्ते। तदुक्तं उपस्कारे – यत्र द्रव्ये कर्मोत्पन्नं तेन समं यावद् द्रव्यं संयुक्तमासीत् तावत्संख्यान् विभागान् जनयित्वा तावतः संयोगानपि पुनरन्यत्र जनयति वेगं पुनरेकमेव स्वाश्रये करोति।[34]इति।

**कर्मभेद**

तत्र विप्रतिपत्तिश्च – दिग्विशिष्टकार्यारम्भककर्मणः उत्तरदेशसंयोगरूपकार्यं केन दिग्विशेषेण सम्बद्धमित्याश्रयीकृत्य महर्षिणा कणादेन उत्क्षेपणावक्षेपनाकुञ्चनप्रसारणगमनभेदेन कर्मणः पञ्चविधत्वं प्रतिपादितम्। तथा हि सूत्रम् – उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि[35] (१.९.७) इति। उर्द्धदेशसंयोगत्वावच्छिन्नकार्यतानिरूपितासमवायिकारणत्वम् इति उत्क्षेपणत्वम्। अधोदेशसंयोगत्वावच्छिन्न-कार्यतानिरूपितासमवायिकारणत्वम् अवक्षेपणत्वम्, अभिमुखदेश-संयोगत्वावच्छिन्नकार्यतानिरूपितासमवायिकारणत्वम् आकुञ्चनत्वम्, तिर्यग्देशसंयोगत्वावच्छिन्नकार्यतानिरूपितासमवायिकारणत्वम् प्रसारणत्वम्, अनियतदेशसंयोगत्वावच्छिन्न-कार्यतानिरूपितासमवायिकारणत्वम् गमनत्वम् इति[36]। अवधेयं यत् उत्क्षेपणत्वादिजातिः कर्मत्वसाक्षाद्व्याप्यजातिरिति प्राच्याः। नव्यास्तु तत्तद्व्यापारवत्त्वमिति कथयन्ति[37]। अतः उत्क्षेपणादीनां तत्तद्देशसंयोगफलकक्रियानुकूलव्यापारत्वमित्येवं लक्षणं प्रतिपादितम्। तेन ऊर्ध्वदेशसंयोगफलकक्रियानुकूलव्यापारत्वम् उत्क्षेपणत्वम्, अधोदेशसंयोगफलकक्रियानुकूलव्यापारत्वम् अवक्षेपणत्वम्, अभिमुखदेशसंयोगफलकक्रियानुकूलव्यापारत्वम् आकुञ्चनत्वम्, तिर्य्यग्देशसंयोगफलकक्रियानुकूलव्यापारत्वं प्रसारणत्वम्, उत्तरदेशसंयोगानुकूलव्यापारत्वं गमनत्वमिति[38]। शिवादित्येन उत्क्षेपणादीनामपि विभागः प्रतिपादितः- उत्क्षेपणादयो विहितनिषिद्धोदासीनरूपाः (४०) इति[39]। अर्थात् उत्क्षेपणादिकर्माणि प्रत्येकं विहितनिषिद्धोदासीनभेदात् त्रिविधानि भवन्ति। यथा वेदोच्चारणाद्यर्थं हस्तोत्क्षेपणं विहितम्, हिंसार्थं दण्डोत्क्षेपणं निषिद्धम्। औदासीन्यात् हस्ताद्युत्क्षेपणमुदासीनमिति। तेन च कर्म पञ्चदशविधं भवति।

अत्रावधेयं यत् नव्यनये उत्क्षेपणादयः चेतनसमवेताः भवन्ति[40]। उत्क्षेपणादिकं इच्छाजन्यप्रयत्नवदात्मसंयोगादसममायिकारणजन्यम्। अतएव अकस्मादेव उत्पद्यमानं वाय्वादिसंघट्टजन्यं उत्क्षेपणादिकं तु गमनमेव। तत्र उत्क्षेपणादिव्यवहारः भाक्तः[41]। ननु उत्क्षेपणादिस्थलेऽपि मुसलमुर्ध्वं गच्छति अधो गच्छतीत्येवं गमनप्रयोगः भवतिमुर्हति। तत्रोच्यते, भ्रमणादिस्थले गमनपदप्रयोगः मुख्यरूपेण, उत्क्षेपणादौ गमनप्रयोगः गौणरूपेणेति ज्ञातव्यम्। वस्तुतः गमनत्वं न तु कर्मत्वजातेः व्याप्यं परन्तु समानार्थकम्। तथात्वे कथं गमनत्वं कर्मत्वपर्यायमपि कर्मत्वव्याप्यजातित्वेन प्रतिपादितम् इति चेन्न, भ्रमणादिविषयाणां एकशब्देन संग्रहार्थं गमनस्य पृथक्त्वमिति[42]। ननु तर्हि उत्क्षेपणादीनामपि गमनपदेन ग्रहणात् का क्षतिः। प्रसङ्गेऽस्मिन् दीनकर्य्यामुक्तम् – मुनिनियोगपर्यनुयोगानर्हत्वात्[43] इति। अर्थात् मुनिवचनं कदापि प्रश्नार्हं निन्दार्हं वा न भवति। अतः कर्मपञ्चविधत्वविषयेऽपि प्रश्नं कर्तुं न शक्यते इति।

**उपसंहृति**

कर्मपदार्थो हि क्रियास्वरूपः। न हि कर्मस्वीकारव्यतिरेकेण द्रव्याणां स्थानान्तरगमनं व्याख्यातुं शक्यते। यद्यपि एतत्कर्म व्यैयाकरणानां कर्तुरीप्सिततमं कर्म न तथापि तैः कर्म स्वीक्रियत एव परन्तु क्रियाशब्देन। तथात्वेऽपि वैयाकरणसम्मतक्रियया न्यायवैशेषिकसम्मतकर्मणः भेदः अस्ति। यतो हि वैयाकरणानां नये धात्वर्थः क्रिया। न हि

[33] सेख-साविर-आलि-सम्पादिते वैशेषिकसूत्रोपस्कारे, २०९ पृष्ठाङ्के

[34] तदेव, सूत्रम्*(१.१.२८)*, ९८० पृष्ठाङ्के

[35] तदेव, ९९ पृष्ठाङ्के

[36] भाषापरिच्छेदे

[37] नव्यास्तूर्द्धदेशसंयोगफकक्रियानुकूव्यापारत्वमुत्क्षेपणत्वम् (मुक्तावलीसंग्रहे)

[38] तदेव

[39] सप्तपदार्थीग्रन्थे, ३६ पृष्ठाङ्के

[40] उत्क्षिपतीत्यादिव्यवहारो चेतनेष्वेवानुभूयते (मुक्तावलीसंग्रहे)

[41] भाक्तस्तत्रोत्क्षेपमव्यवहारः(मुक्तावलीसंग्रहे)

[42] तस्माद् गमनग्रहणेनैतेषामपि ग्रहणात् पञ्चैवेत्यवधारणम् (न्यायकन्दलीटीकायाम्)

[43] न्यायसिद्धान्तमुक्तावल्याम्, ५५ पृष्ठाङ्के

सर्वेषां धातूनां अर्थः द्रव्यस्थानान्तरगमनं सूचयति। अस्-भू-स्था-स्मृ-इष्-इत्यादीनां धातूनामर्थः संयोगविभागासमवायिकारणरूपकर्म न बोधयतीति। अत्रावधेयं यत् कर्म न पदार्थान्तरं परन्तु संयोगविभागरूपमिति न्यायभूषणकारमतम्। परन्तु मतमिदं न ग्राह्यम्, यतो हि कर्म यदि संयोगविभागरूपं स्यात्तदा, आकाशे उड्डीयमानविहगानां कर्म कथमपि प्रत्यक्षभूतं न भविष्यति। तत्र संयोगविभागानां प्रत्यक्षासम्भवात्। किञ्च कर्म अनुमेयमिति प्राभाकरमतमपि अनया युक्त्या निराकर्तुं शक्यते इति शिवम्।

**सहायकग्रन्थाः**


1. प्रशस्तपादाचार्यः, प्रशस्तपादभाष्यम् (प्रथमभागः), अनुवादकः सम्पादकश्च दण्डिस्वामीदामोदराश्रमः, प्रकाशकः – दामोदराश्रमः।
2. मिश्रः,शङ्करः, वैशेषिकसूत्रोपस्कारः(प्रथमाध्यायः), सम्पादकः- सेख-साविर-आलि, संस्कृत वुक डिपो, कलकाता, २०१३ ईशवीयबर्षम्।
3. मिश्रः, शङ्करः,वैशेषिकसूत्रोपस्कारः, व्याखाता-ढुण्ढिराजशास्त्री, सम्पादकः- श्रीनारायणमिश्रः, चोखाम्बा प्रकाशन, वाराणसी, २००७ ईशवीयबर्षम्।
4. शिवादित्यः, सप्तपदार्थी, सम्पादकः- अमरेन्द्रमोहनतर्कतीर्थः, नरेन्द्रचन्द्रवेदान्ततीर्थः, मेट्रोपलिटन् प्रिन्टिं एण्ड पाब्लिसिं हाउस् लिमिटेड्, कलकाता, १९३४ ईशवीयबर्षम्।
5. भट्टाचार्यः, विश्वनाथपञ्चाननः,न्यायसिद्धान्तमुक्तावली, सम्पादकः-हरिरामशुक्लः, चौखाम्भा संस्कृत संस्थान, वाराणसी, १९९७ ईशवीयबर्षम्।
6. भट्टाचार्यः, विश्वनाथपञ्चाननः,भाषापरिच्छेदः, सम्पादकः- पञ्चाननभट्टाचार्यशास्त्री, महाबोधि वुक् एजेन्सि, कोलकाता, २०१६ ईशवीयबर्षम्।
7. श्रीमदन्नंभट्टः, तर्कसंग्रहः, सम्पादकः- श्रीनारायणचन्द्रगोस्वामी, संस्कृत पुस्तक भाण्डार, कलिकाता, १३९० बङ्गाब्दः।
8. भट्टाचार्यः, अयनः, कारकविवेकः, संस्कृत वुक् डिपो, कलकाता, २०१२ ईशवीयबर्षम्।